मन्त्रैश्च बध्नीयान्मन्त्रकोविदः। सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरी मता। देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः। भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरम्। विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः। यथा निवार्य्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः। मन्त्राणां ग्रहणं कार्य्यं स्त्रीमांसमधुवर्जिना। जिताहारेण शुचिना कुशास्तरणशायिना। गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः। पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः। मन्त्रास्तु विधिना प्रोक्ता हीना वा स्वरवर्णतः। यस्मान्न सिद्धिमायान्ति तस्माद् योज्योऽगदक्रमः। समन्ततः शिराःदंशाद्विद्ध्येत् कुशलो भिषक्। शाखाग्रे वा ललाटे वा वेध्यास्ता विसृते विषे। रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषम्। तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया"।

**सर्पकङ्काली** स्त्री० सर्पस्येव कङ्कालभङ्गविशेषो यस्याः गौरा० ङीष्। सर्पविषघातिन्यां लतायां शब्दच०।

**सर्पगन्धा** स्त्री सर्पं तद्विषं गन्धयति हिनस्ति गन्ध-अण्। विषहारिण्यां लतायां जटा०। [हरीलतायां रत्नमा०।

**सर्पघातिनी** स्त्री सर्पं तद्विषं हन्ति हन-णिनि। सर्पविष-

**सर्पच्छत्र** पुंस्त्री० सर्पस्य फणाविस्तारस्येव छेदो यस्य। नकुले हेमच०।

**सर्पदंष्ट्र** पु० सर्पस्य दंष्ट्रेव पुष्पमस्य। १नागदन्तीवृक्षे शब्दच०। सर्पस्य दंष्ट्रेव स्पर्शने दुःखदत्वात्। २वृश्चिकालीलतायां स्त्री (बिछाति) रत्नमा०। [क्षुद्रायां राजनि०।

**सर्पदंष्ट्रिका** स्त्री सर्पदंष्ट्राऽऽकारोऽस्त्यस्याः ठन्। अजशृ-

**सर्पदण्डी** स्त्री सर्पं तद्विषं दण्डयति दण्ड-अण्। गोरक्षी-वृक्षे राजनि०। [ङीष्। नागदन्तीवृक्षे राजनि०।

**सर्पदन्ती** स्त्री सर्पस्य दन्त इव पुष्पमस्त्यस्याः अच् गौरा०

**सर्पनामा** स्त्री सर्पस्य नामास्य वाचकशब्दे। सर्पकङ्कालीभेदे शब्दच०।

**सर्पदमनी** स्त्री सर्पान् दमयति अनया दम-णिच्-करणे ल्युट् ङीप्। वन्ध्याकर्कोट्यां राजनि०। [राजनि०।

**सर्पपुष्पी** स्त्री सर्पः सर्पदन्त इव पुष्पमस्याः। नागदन्त्यां

**सर्पफणज** पु० सर्पस्य फणे जायते जन-ड। सर्पफणजातमणौ शब्दमा०।

**सर्पभुज्** पु० सर्पं भुङ्क्ते भुज-क्विप्। १मयूरे हेमच०। २सर्पभक्षके गरुडादौ च। [अमरः।

**सर्पराज** पु० सर्पाणां राजा टच् समा०। वासुकौ नागभेदे

**सर्पलता** स्त्री सर्प इव लता। नागवल्ल्यां ताम्बूल्यां राजनि०

**सर्पसत्र** न० सर्पेण होम्यद्रव्येण तन्नाशनार्थं वा सत्रम्। जनमेजयानुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञभेदे भा०आ० ५१अ०५८अ० तत्कथा दृश्या।

**सर्पसहा** स्त्री सर्पं सहते सह-अच्। सर्पकङ्कालीलतायां राजनि०। [च।

**सर्पहन्** पु० सर्पं हन्ति हन-क्विप्। १नकुले हेमच० २गरुडे

**सर्पाक्षी** स्त्री सर्पस्येवाक्षि पुष्पं यस्याः षच् समा०। १गन्धनाकुल्याम् राजनि०। [२महिषकन्दभेदे च राजनि०।

**सर्पाख्य** पु० सर्पस्याख्याऽऽख्या यस्य। १नागकेशरे रत्नमा०।

**सर्पाङ्गी** स्त्री सर्पस्येवाङ्गं यस्याः ङीष्। १सर्पकङ्कालीलतायां रत्नमा०। २सिंहल्यां राजनि०।

**सर्पादनी** स्त्री सर्पं सर्पविषमत्त्यनया अद-ल्युट् ङीप्। नाकुल्यां राजनि०। [प्रकृतयोऽप्यत्र।

**सर्पाराति** पु० ६त०। १गरुडे हेमच० २नकुले च सर्पारि-

**सर्पावास** न० सर्पाणामावासो यत्र। १चन्दनवृक्षे राजनि०। ६त०। २सर्पाणामावासे पु०।

**सर्पाशन** पुंस्त्री० सर्पमश्नाति अश-ल्युट्। १मयूरे हला०। स्त्रियां ङीप्। २गरुडे पु०।

**सर्पिस्** न० सृप-इसि। घृते अमरः।

**सर्पिणी** स्त्री सृप-णिनि ङीप्। १सर्पयोषिति शब्दर०। २क्षुपभेदे राजनि०। ३गमनकर्त्तरि त्रि० स्त्रियां ङीप्।

**सर्पीष्ट** न० सर्पीणां भुजगीनामिष्टम्। चन्दने रत्नमा०।

**सर्पेष्ट** न० सर्पाणामिष्टम्। चन्दने जटा० २सर्पाभीष्टे त्रि०।

**सर्ब** सर्पणे भ्वा०पर०सक० सेट्। सर्बति असर्बीत् अणोपदेशत्वात् न णत्वमित्येके षोपदेश एव न्याय्यः।

**सर्व** पु० सृ-व तस्य नेत्त्वम्। १शिवे २विष्णौ च विष्णुस०। "असतश्च सतश्चैव सर्वस्य प्रभवाप्ययौ। सर्वस्य सर्वदा ज्ञानात् सर्वमेतं प्रचक्षते" विष्णुपु० तन्नामनिरुक्तिः। तथा च सर्वं ज्ञेयत्वेन उत्पाद्यत्वादिना वाऽस्त्यस्य अच्। ३सम्पूर्णे ४सकले च त्रि० अमरः। असंज्ञायामस्य सर्वनामसंज्ञा तत्कार्य्यञ्च। सर्वशब्दार्थस्तु स्वार्थान्वयितावच्छेदकधर्मव्यापकताहशधर्मावच्छिन्नान्वयितावच्छेदकावच्छिन्नव्याप्यपर्य्याप्तिकधर्मावच्छिन्नः" गा०श०। "व्यापकत्वावच्छिन्नः दिनकरी। यथा सर्वे घटा रूपवन्त इत्यादौ सर्वपदार्थः। "बुद्धिविषयव्याप्तत्वावच्छिन्नसमूहत्ववान्" इति शाब्दिका वदन्ति। [२सर्वसोढरि त्रि०।

**सर्वंसहा** स्त्री सर्वं सहते खच् मुम् च। १पृथिव्याम् अमरः